# Natya Shastra Chapter 12 gatiprachAra

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૧૨ ગતિપ્રચાર

## Document Information

Text title : naaTyashaastra adhyaaya 12 gatiprachAra

File name : natya12.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : Sowmya Krishnapur krsowmya at yahoo.com

Proofread by : Sowmya Krishnapur krsowmya at yahoo.com

Latest update : May 22, 2007

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

Natya Shastra Chapter 12 gatiprachAra

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૧૨ ગતિપ્રચાર

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ દ્વાદશોઽધ્યાયઃ ગતિપ્રચાર

એવં વ્યાયામસંયોગે કાર્યં મણ્ડલકલ્પનમ્ ।
અતઃ પરં પ્રવક્ષ્યામિ ગતીસ્તુ પ્રકૃતિસ્થિતાઃ ॥ ૧॥

તત્રોપવહનં કૃત્વા ભાણ્ડવાદ્યપુરસ્કૃતમ્ ।
યથામાર્ગરસોપેતં પ્રકૃતીનાં પ્રવેશને ॥ ૨॥

ધ્રુવાયાં સમ્પ્રયુક્તાયાં પટે ચૈવાપકર્ષિતે ।
કાર્યઃ પ્રવેશઃ પાત્રાણાં નાનાર્થરસસમ્ભવઃ ॥ ૩॥

સ્થાનં તુ વૈષ્ણવં કૃત્વા હ્યુત્તમે મધ્યમે તથા ।
સમુન્નતં સમં ચૈવ ચતુરસ્રમુરસ્તથા ॥ ૪॥

બાહુશીર્ષે પ્રસન્ને ચ નાત્યુત્ક્ષિપ્તે ચ કારયેત્ ।
ગ્રીવાપ્રદેશઃ કર્તવ્યો મયૂરાઞ્ચિતમસ્તકઃ ॥ ૫॥

કર્ણાદષ્ટાઙ્ગુલસ્થે ચ બાહુશીર્ષે પ્રયોજયેત્ ।
ઉરસશ્ચાપિ ચિબુકં ચતુરઙ્ગુલસંસ્થિતમ્ ॥ ૬॥

હસ્તૌ તથૈવ કર્તવ્યૌ કટીનાભિતટસ્થિતૌ ।
દક્ષિણો નાભિસંસ્થસ્તુ વામઃ કટિતટસ્થિતઃ ॥ ૭॥

પાદયોરન્તરં કાર્યં દ્વૌ તાલાવર્ધમેવ ચ ।
પાદોત્ક્ષેપસ્તુ કર્તવ્યઃ સ્વપ્રમાણવિનિર્મિતઃ ॥ ૮॥

ચતુસ્તાલો દ્વિતાલશ્ચાપ્યેકતાલસ્તથૈવ ચ ।
ચતુસ્તાલસ્તુ દેવાનાં પાર્થિવાનાં તથૈવ ચ ॥ ૯॥

દ્વિતાલશ્ચૈવ મધ્યાનાં તાલઃ સ્ત્રીનીચલિઙ્ગિનામ્ ।

ચતુષ્કલોઽથ દ્વિકલસ્તથા હ્યેકકલઃ સ્મૃતઃ ॥ ૧૦॥

ચતુષ્કલો હ્યુત્તમાનાં મધ્યાનાં દ્વિકલો ભવેત્ ।
તથા ચૈકકલઃ પાદો નીચાનાં સમ્પ્રકીર્તિતઃ ॥ ૧૧॥

સ્થિતં મધ્યં દ્રુતં ચૈવ સમવેક્ષ્ય લયત્રયમ્ ।
યથાપ્રકૃતિનાટ્યજ્ઞો ગતિમેવં પ્રયોજયેત્ ॥ ૧૨॥

ધૈર્યોપપન્ના ગતિરુત્તમાનાં મધ્યા ગતિર્મધ્યમસમ્મતાનામ્ ।
દ્રુતા ગતિશ્ચ પ્રચુરાધમાનાં લયત્રયં સત્ત્વવશેન યોજ્યમ્ ॥ ૧૩॥

એષ એવ તુ વિજ્ઞેયઃ કલાતાલલયે વિધિઃ ।
પુનર્ગતિપ્રચારસ્ય પ્રયોગં શ્રુણુતાનઘાઃ ॥ ૧૪॥

સ્વભાવાત્તૂત્તમગતૌ કાર્યં જાનુકટીસમમ્ ।
યુદ્ધચારીપ્રયોગેષુ જાનુસ્તનસમં ન્યસેત્ ॥ ૧૫॥

પાર્શ્વક્રાન્તૈઃ સલલિતૈઃ પાદૈર્વાદ્યાન્વિતૈરથ ।
રઙ્ગકોણોન્મુખં ગચ્છેત્ સમ્યક્ પઞ્ચપદાનિ ચ ॥ ૧૬॥

વામવેધં તતઃ કુર્યાદ્વિક્ષેપં દક્ષિણેન તુ ।
પરિવૃત્ય દ્વિતીયં તુ ગચ્છેત્ કોણં તતઃ પરમ્ ॥ ૧૭॥

તત્રાપિ વામવેધસ્તુ વિક્ષેપો દક્ષિણેન ચ ।
તતો ભાણ્ડોન્મુખો ગચ્છેત્ તાન્યેવ તુ પદાનિ ચ ॥ ૧૮॥

એવં ગતાગતૈઃ કૃત્વા પદાનામિહ વિંશતિમ્ ।
વામવેધં તતઃ કુર્યાત્ વિક્ષેપં દક્ષિણસ્ય ચ ॥ ૧૯॥

રઙ્ગે વિકૃષ્ટે ભરતેન કાર્યો ગતાગતૈઃ પાદગતિપ્રચારઃ ।
ત્ર્યશ્રસ્ત્રિકોણે ચતુરસ્રરઙ્ગે ગતિપ્રચારશ્ચતુરસ્ર એવ ॥ ૨૦॥

યઃ સમૈઃ સંહિતો ગચ્છેત્તત્ર કાર્યો લયાશ્રયઃ ।
ચતુષ્કલોઽથ દ્વિકલસ્તથૈવૈકકલઃ પુનઃ ॥ ૨૧॥

અથ મધ્યમનીચૈસ્તુ ગચ્છેદ્યઃ પરિવારિતઃ ।
ચતુષ્કલમથાર્ધં ચ તથા ચૈકકલં પુનઃ ॥ ૨૨॥

દૈત્યદાનવયક્ષાણાં નૃપપન્નગરક્ષસામ્ ।
ચતુસ્તાલપ્રમાણેન કર્તવ્યાથ ગતિર્બુધૈઃ ॥ ૨૩॥

દિવૌકસાં તુ સર્વેષાં મધ્યમા ગતિરિષ્યતે ।
તત્રાપિ ચોદ્ધતા યે તુ તેષાં દેવૈઃ સમા ગતિઃ ॥ ૨૪॥

ઋષય ઊચુઃ -
યદા મનુષ્યા રાજાનસ્તેષાં દેવગતિઃ કથમ્ ।
અત્રોચ્યતે કથં નૈષા ગતી રાજ્ઞાં ભવિષ્યતિ ॥ ૨૫॥

ઇહ પ્રકૃતયો દિવ્યા દિવ્યમાનુષ્ય એવ ચ ।
માનુષ્ય ઇતિ વિજ્ઞેયા નાટ્યનૃત્તક્રિયાં પ્રતિ ॥ ૨૬॥

દેવાનાં પ્રકૃતિર્દિવ્યા રાજ્ઞાં વૈ દિવ્યમાનુષી ।
યા ત્વન્યા લોકવિદિતા માનુષી સા પ્રકીર્તિતા ॥ ૨૭॥

દેવાંશજાસ્તુ રાજાનો વેદાધ્યાત્મસુ કીર્તિતાઃ ।
એવં દેવાનુકરણે દોષો હ્યત્ર ન વિદ્યતે ॥ ૨૮॥

અયં વિધિસ્તુ કર્તવ્યઃ સ્વચ્છન્દગમનં પ્રતિ ।
સંભ્રમોત્પાતરોષેષુ પ્રમાણં ન વિધીયતે ॥ ૨૯॥

સર્વાસાં પ્રકૃતીનાં તુ અવસ્થાન્તરસંશ્રયા ।
ઉત્તમાધમમધ્યાનાં ગતિઃ કાર્યા પ્રયોક્તૃભિઃ ॥ ૩૦॥

ચતુરર્ધકલં વા સ્યાત્ તદર્ધકલમેવ ચ ।
અવસ્થાન્તરમાસાદ્ય કુર્યાદ્ ગતિવિચેષ્ટિતમ્ ॥ ૩૧॥

જ્યેષ્ઠે ચતુષ્કલં હ્યત્ર મધ્યમે દ્વિકલં ભવેત્ ।
દ્વિકલા ચોત્તમે યત્ર મધ્યે ત્વેકકલા ભવેત્ ॥ ૩૨॥

કલિકં મધ્યમે યત્ર નીચેષ્વર્ધકલં ભવેત્ ।
એવમર્ધાર્ધહીનં તુ જડાનાં સમ્પ્રયોજયેત્ ॥ ૩૩॥

જ્વરાર્તે ચ ક્ષુધાર્તે ચ તપઃશ્રાન્તે ભયાન્વિતે ।
વિસ્મિતે ચાવહિત્થે ચ તથૌત્સુક્યસમન્વિતે ॥ ૩૪॥

શ‍ૃઙ્ગારે ચૈવ શોકે ચ સ્વચ્છન્દગમને તથા ।
ગતિઃ સ્થિતલયા કાર્યાધિકલાન્તરપાતિતા ॥ ૩૫॥

પુનશ્ચિન્તાન્વિતે ચૈવ ગતિઃ કાર્યા ચતુષ્કલા ।
અસ્વસ્થકામિતે ચૈવ ભયે વિત્રાસિતે તથા ॥ ૩૬॥

આવેગે ચૈવ હર્ષે ચ કાર્યે યચ્ચ ત્વરાન્વિતમ્ ।

અનિષ્ટશ્રવણે ચૈવ ક્ષેપે ચાદ્ભુતદર્શને ॥ ૩૭॥

અપિ ચાત્યાયિકે કાર્યે દુઃખિતે શત્રુમાર્ગણે ।
અપરાદ્ધાનુસરણે શ્વાપદાનુગતૌ તથા ॥ ૩૮॥

એતેષ્વેવં ગતિં પ્રાજ્ઞો વિકલાં સમ્પ્રયોજયેત્ ।
ઉત્તમાનાં ગતિર્યા તુ ન તાં મધ્યેષુ યોજયેત્ ॥ ૩૯॥

યા ગતિર્મધ્યમાનાં તુ ન તાં નીચેષુ યોજયેત્ ।
ગતિઃ શ‌ૃઙ્ગારિણી કાર્યા સ્વસ્થકામિતસમ્ભવા ॥ ૪૦॥

દૂતીદર્શિતમાર્ગસ્તુ પ્રવિશેદ્રઙ્ગમણ્ડલમ્ ।
સૂચયા ચાપ્યભિનયં કુર્યાદર્થસમાશ્રયમ્ ॥ ૪૧॥

હૃદ્યૈર્ગન્ધૈસ્તથા વસ્ત્રૈરલઙ્કારૈશ્ચ ભૂષિતઃ ।
નાનાપુષ્પસુગન્ધાભિર્માલાભિઃ સમલંકૃતઃ ॥ ૪૨॥

ગચ્છેત્ સલલિતૈઃ પાદૈરતિક્રાન્તસ્થિતૈસ્તથા ।
તથા સૌષ્ઠવસંયુક્તૈર્લયતાલવશાનુગૈઃ ॥ ૪૩॥

પાદયોરનુગૌ હસ્તૌ નિત્યં કાર્યૌ પ્રયોક્તૃભિઃ ।
ઉત્ક્ષિપ્ય હસ્તં પાતેન પાદયોશ્ચ વિપર્યયાત્ ॥ ૪૪॥

પ્રચ્છન્નકામિતે ચૈવ ગતિં ભૂયો નિબોધત ।
વિસર્જિતજનઃ સ્રસ્તસ્તથા દૂતીસહાયવાન્ ॥ ૪૫॥

નિર્વાણદીપો નાત્યર્થં ભૂષણૈશ્ચ વિભૂષિતઃ ।
વેલાસદૃશવસ્ત્રશ્ચ સહ દૂત્યા શનૈસ્તથા ॥ ૪૬॥

વ્રજેત્ પ્રચ્છન્નકામસ્તુ પાદૈર્નિશ્શબ્દમન્દગૈઃ ।
શબ્દશંક્યુત્સુકશ્ચ સ્યાદવલોકનતત્પરઃ ॥ ૪૭॥

વેપમાનશરીરશ્ચ શંકિતઃ પ્રસ્ખલન્ મુહુઃ ।
રસે રૌદ્રે તુ વક્ષ્યામિ દૈત્યરક્ષોગણાન્ પ્રતિ ॥ ૪૮॥

એક એવ રસસ્તેષાં સ્થાયી રૌદ્રો દ્વિજોત્તમાઃ ।
નેપથ્યરૌદ્રો વિજ્ઞેયસ્ત્વઙ્ગરૌદ્રસ્તથૈવ ચ ॥ ૪૯॥

તથા સ્વભાવજશ્ચૈવ ત્રિધા રૌદ્રઃ પ્રકલ્પિતઃ ।
રુધિરક્લિન્નદેહો યો રુધિરાર્દ્રમુખસ્તથા ॥ ૫૦॥

તથા પિશિતહસ્તશ્ચ રૌદ્રો નેપથ્યજસ્તુ સઃ ।
બહુબાહુર્બહુમુખો નાનાપ્રહરણાકુલઃ ॥ ૫૧॥

સ્થૂલકાયસ્તથા પ્રાંશુરઙ્ગરૌદ્રઃ પ્રકીર્તિતઃ ।
રક્તાક્ષઃ પિઙ્ગકેશશ્ચ અસિતો વિકૃતસ્વરઃ ॥ ૫૨॥

રૂક્ષો નિર્ભર્ત્સનપરો રૌદ્રઃ સોઽયં સ્વભાવજઃ ।
ચતુસ્તાલાન્તરોત્ક્ષિપ્તૈઃ પાદૈસ્ત્વન્તરપાતિતૈઃ ॥ ૫૩॥

ગતિરેવં પ્રકર્તવ્યા તેષાં યે ચાપિ તદ્વિધાઃ ।
અહૃદ્યા તુ મહી યત્ર શ્મશાનરણકશ્મલા ॥ ૫૪॥

ગતિં તત્ર પ્રયુઞ્જીત બીભત્સાભિનયં પ્રતિ ।
ક્વચિદાસન્નપતિતૈઃ વિકૃષ્ટપતિતૈઃ ક્વચિત્ ॥ ૫૫॥

એલકાક્રીડિતૈઃ પાદૈરુપર્યુપરિ પાતિતૈઃ ।
તેષામેવાનુગૈર્હસ્તૈર્બીભત્સે ગતિરિષ્યતે ॥ ૫૬॥

અથ વીરે ચ કર્ત્તવ્યા પાદવિક્ષેપસંયુતા ।
દ્રુતપ્રચારાધિષ્ઠાના નાનાચારીસમાકુલા ॥ ૫૭॥

પાર્શ્વક્રાન્તૈર્દ્રુતાવિદ્ધૈઃ સૂચીવિદ્ધૈસ્તથૈવ ચ ।
કલાકાલગતૈઃ પાદૈરાવેગે યોજયેત્ ગતિમ્ ॥ ૫૮॥

ઉત્તમાનામયં પ્રાયઃ પ્રોક્તો ગતિપરિક્રમઃ ।
મધ્યાનામધમાનાં ચ ગતિં વક્ષ્યામ્યહં પુનઃ ॥ ૫૯॥

વિસ્મયે ચૈવ હર્ષે ચ વિક્ષિપ્તપદવિક્રમાન્ ।
આસાદ્ય તુ રસં હાસ્યમેતચ્ચાન્યં ચ યોજયેત્ ॥ ૬૦॥

પુનશ્ચ કરુણે કાર્યા ગતિઃ સ્થિરપદૈરથ ।
બાષ્પામ્બુરુદ્ધનયનઃ સન્નગાત્રસ્તથૈવ ચ ॥ ૬૧॥

ઉત્ક્ષિપ્તપાતિતકરસ્તથા સસ્વનરોદનઃ ।
ગચ્છેત્તથાધ્યધિકયા પ્રત્યગ્રાપ્રિયસંશ્રયે ॥ ૬૨॥

એષા સ્ત્રીણાં પ્રયોક્તવ્યા નીચસત્ત્વે તથૈવ ચ ।
ઉત્તમાનાં તુ કર્તવ્યા સધૈર્યા બાષ્પસઙ્ગતા ॥ ૬૩॥

નિઃશ્વાસૈરાયતોત્સૃષ્ટૈસ્તથૈવોર્ધ્વનિરીક્ષિતૈઃ ।
ન તત્ર સૌષ્ઠવં કાર્યં ન પ્રમાણં તથાવિધમ્ ॥ ૬૪॥

મધ્યાનામપિ સત્ત્વજ્ઞા ગતિર્યોજ્યા વિધાનતઃ ।
ઉરઃપાતહતોત્સાહઃ શોકવ્યાકુલચેતનઃ ॥ ૬૫ ॥

નાત્યુત્ક્ષિપ્તૈઃ પદૈર્ગચ્છેત્ ઇષ્ટબન્ધુનિપાતને ।
ગાઢપ્રહારે કાર્યા ચ શિથિલાઙ્ગભુજાશ્રયા ॥ ૬૬ ॥

વિઘૂર્ણિતશરીરા ચ ગતિશ્ચૂર્ણપદૈરથ ।
શીતેન ચાભિભૂતસ્ય વર્ષેણાભિદ્રુતસ્ય ચ ॥ ૬૭ ॥

ગતિઃ પ્રયોક્તૃભિઃ કાર્યા સ્ત્રીનીચપ્રકૃતાવથ ।
પિણ્ડીકૃત્ય તુ ગાત્રાણિ તેષાં ચૈવ પ્રકમ્પનમ્ ॥ ૬૮ ॥

કરૌ વક્ષસિ નિક્ષિપ્ય કુબ્જીભૂતસ્તથૈવ ચ ।
દન્તોષ્ઠસ્ફુરણં ચૈવ ચિબુકસ્ય પ્રકમ્પનમ્ ॥ ૬૯ ॥

કાર્યં શનૈશ્ચ કર્તવ્યં શીતાભિનયને ગતૌ ।
તથા ભયાનકે ચૈવ ગતિઃ કાર્યા વિચક્ષણૈઃ ॥ ૭૦ ॥

સ્ત્રીણાં કાપુરુષાણાં ચ યે ચાન્યે સત્ત્વવર્જિતાઃ ।
વિસ્ફારિતે ચલે નેત્રે વિધુતં ચ શિરસ્તથા ॥ ૭૧ ॥

ભયસંયુક્તયા દૃષ્ટ્યા પાર્શ્વયોશ્ચ વિલોકનૈઃ ।
દ્રુતૈશ્ચૂર્ણપદૈશ્ચૈવ બદ્ધ્વા હસ્તં કપોતકમ્ ॥ ૭૨ ॥

પ્રવેપિતશરીરશ્ચ શુષ્કોષ્ઠસ્સ્ખલિતં વ્રજેત્ ।
એષાનુકરણે કાર્યા તર્જને ત્રાસને તથા ॥ ૭૩ ॥

સત્ત્વં ચ વિકૃતં દૃષ્ટ્વા શ્રુત્વા ચ વિકૃતં સ્વરમ્ ।
એષા સ્ત્રીણાં પ્રકર્ત્તવ્યા નૃણાં ચાક્ષિપ્તવિક્રમા ॥ ૭૪ ॥

ક્વચિદાસન્નપતિતૈર્વિકૃષ્ટપતિતૈઃ ક્વચિત્ ।
એલકાક્રીડિતૈઃ પાદૈરુપર્યુપરિ પાતિતૈઃ ॥ ૭૫ ॥

એષામેવાનુગૈર્હસ્તૈર્ગતિં ભીતેષુ યોજયેત્ ।
વણિજાં સચિવાનાં ચ ગતિઃ કાર્યા સ્વભાવજા ॥ ૭૬ ॥

કૃત્વા નાભિતટે હસ્તમુત્તાનખટકામુખમ્ ।
આદ્યં ચારાલમુત્તાનં કુર્યાત્પાર્શ્વં સ્તનાન્તરે ॥ ૭૭ ॥

ન નિષણ્ણં ન ચ સ્તબ્ધં ન ચાપિ પરિવાહિતમ્ ।

કૃત્વા ગાત્રં તથા ગચ્છેત્તેન ચૈવ ક્રમેણ તુ ॥ ૭૮॥

અતિક્રાન્તૈર્પદૈર્વિપ્રા દ્વિતાલાન્તરગામિભિઃ ।
યતીનાં શ્રમણાનાં ચ યે ચાન્યે તપસિ સ્થિતાઃ ॥ ૭૯॥

તેષાં કાર્યા ગતિર્યે તુ નૈષ્ઠિકં વ્રતમાશ્રિતાઃ ।
આલોલચક્ષુશ્ચ ભવેદ્યુગમાત્રનિરીક્ષણઃ ॥ ૮૦॥

ઉપસ્થિતસ્મૃતિશ્ચૈવ ગાત્રં સર્વં વિધાય ચ ।
અચઞ્ચલમનાશ્ચૈવ યથાવલ્લિઙ્ગમાશ્રિતઃ ॥ ૮૧॥

વિનીતવેષશ્ચ ભવેત્ કષાયવસનસ્તથા ।
પ્રથમં સમપાદેન સ્થિત્વા સ્થાનેન વૈ બુધઃ ॥ ૮૨॥

હસ્તં ચ ચતુરં કૃત્વા તથા ચૈકં પ્રસારયેત્ ।
પ્રસન્નં વદનં કૃત્વા પ્રયોગસ્ય વશાનુગઃ ॥ ૮૩॥

અનિષણ્ણેન ગાત્રેણ ગતિં ગચ્છેદ્ વ્યતિક્રમાત્ ।
ઉત્તમાનાં ભવેદેષા લિઙ્ગિનાં યે મહાવ્રતાઃ ॥ ૮૪॥

એભિરેવ વિપર્યસ્તૈર્ગુણૈરન્યેષુ યોજયેત્ ।
તથા વ્રતાનુગાવસ્થા હ્યન્યેષાં લિઙ્ગિનાં ગતિઃ ॥ ૮૫॥

વિભ્રાન્તા વાપ્યુદાત્તા વા વિભ્રાન્તનિભૃતાપિ વા ।
શકટાસ્યસ્થિતૈઃ પાદૈરતિક્રાન્તૈસ્તથૈવ ચ ॥ ૮૬॥

કાર્યા પાશુપતાનાં ચ ગતિરુદ્ધતગામિની ।
અન્ધકારેઽથ યાને ચ ગતિઃ કાર્યા પ્રયોક્તૃભિઃ ॥ ૮૭॥

ભૂમૌ વિસર્પિતૈઃ પાદૈર્હસ્તૈર્માર્ગપ્રદર્શિભિઃ ।
રથસ્થસ્યાપિ કર્તવ્યા ગતિશ્ચૂર્ણપદૈરથ ॥ ૮૮॥

સમપાદં તથા સ્થાનં કૃત્વા રથગતિં વ્રજેત્ ।
ધનુર્ગૃહીત્વા ચૈકેન તથા ચૈકેન કૂબરમ્ ॥ ૮૯॥

સૂતશ્ચાસ્ય ભવેદેવં પ્રતોદપ્રગ્રહાકુલઃ ।
વાહનાનિ વિચિત્રાણિ કર્તવ્યાનિ વિભાગશઃ ॥ ૯૦॥

દ્રુતૈશ્ચૂર્ણપદૈશ્ચૈવ ગન્તવ્યં રઙ્ગમણ્ડલે ।
વિમાનસ્થસ્ય કર્તવ્યા હ્યેષૈવ સ્યન્દિની ગતિઃ ॥ ૯૧॥

આરોઢુમુદ્વહેદ્ ગાત્રં કિઞ્ચિત્ સ્યાદુન્મુખસ્થિતમ્ ।
અસ્યૈવ વૈપરીત્યેન કુર્યાચ્ચાપ્યવરોહણમ્ ॥ ૯૨॥

અધોઽવલોકનૈશ્ચૈવ મણ્ડલાવર્તનેન ચ ।
આકાશગમને ચૈવ કર્તવ્યા નાટ્યયોક્તૃભિઃ ॥ ૯૩॥

સ્થાનેન સમપાદેન તથા ચૂર્ણપદૈરપિ ।
વ્યોમ્નશ્ચાવતરેદ્યસ્તુ તસ્યૈતાં કારયેત્ ગતિમ્ ॥ ૯૪॥

ઋજ્વાયતોન્નતનતૈઃ કુટિલાવર્તિતૈરથ ।
ભ્રશ્યતશ્ચ તથાકાશાદપવિદ્ધભુજા ગતિઃ ॥ ૯૫॥

વિકીર્ણવસના ચૈવ તથા ભૂગતલોચના ।
પ્રાસાદદ્રુમશૈલેષુ નદીનિમ્નોન્નતેષુ ચ ॥ ૯૬॥

આરોહણાવતરણં ચ કાર્યમર્થવશાદ્બુધૈઃ ।
પ્રાસાદારોહણં કાર્યં અતિક્રાન્તૈઃ પદૈરથ ॥ ૯૭॥

ઉદ્વાહ્ય ગાત્રં પાદં ચ સોપાને નિક્ષિપેન્નરઃ ।
તથાવતરણં ચૈવ ગાત્રમાનમ્ય રેચયેત્ ॥ ૯૮॥

પ્રાસાદે યન્મયા પ્રોક્તઃ પ્રતારઃ કેવલો ભવેત્ ।
કિઞ્ચિન્નતાગ્રકાયા તુ પ્રતારે ગતિરિષ્યતે ॥ ૯૯॥

જલપ્રમાણાપેક્ષા તુ જલમધ્યે ગતિર્ભવેત્ ।
તોયેઽલ્પે વસનોત્કર્ષઃ પ્રાજ્યે પાણિવિકર્ષણૈઃ ॥ ૧૦૦॥

પ્રસાર્ય બાહુમેકૈકં મુહુર્બારિવિકર્ષણૈઃ ।
તિર્યક્ પ્રસારિતા ચૈવ હ્રિયમાણા ચ વારિણા ॥ ૧૦૧॥

અશેષાઙ્ગાકુલાધૂતવદના ગતિરિષ્યતે ।
નૌસ્થસ્યાપિ પ્રયોક્તવ્યા દ્રુતૈશ્ચૂર્ણપદૈર્ગતિઃ ॥ ૧૦૨॥

અતિક્રાન્તેન પાદેન દ્વિતીયેનાઞ્ચિતેન ચ ।
પ્રાસાદારોહણે યત્તુ તદેવાદ્રિષુ કારયેત્ ॥ ૧૦૩॥

કેવલમૂર્ધ્વનિક્ષેપમદ્રિષ્વઙ્ગં ભવેદથ ।
દ્રુમે ચારોહણં કાર્યમતિક્રાન્તૈઃ સ્થિતૈઃ પદૈઃ ॥ ૧૦૪॥

સૂચીવિદ્ધૈરપક્રાન્તૈઃ પાર્શ્વક્રાન્તૈસ્તથૈવ ચ ।
એતદેવાવતરણં સરિત્સ્વપિ નિયોજયેત્ ॥ ૧૦૫॥

અનેનૈવ વિધાનેન કર્તવ્યં ગતિચેષ્ટિતમ્ ।
સંજ્ઞામાત્રેણ કર્તવ્યાન્યેતાનિ વિધિપૂર્વકમ્ ॥ ૧૦૬॥

કસ્માન્મૃત ઇતિ પ્રોક્તે કિં કર્તવ્યં પ્રયોક્તૃભિઃ ।
અઙ્કુશગ્રહણાન્નાગં ખલીનગ્રહણાદ્ધયમ્ ॥ ૧૦૭॥

પ્રગ્રહગ્રહણાદ્યાનમેવમેવાપરેષ્વપિ ।
અશ્વયાને ગતિઃ કાર્યા વૈશાખસ્થાનકેન તુ ॥ ૧૦૮॥

યથા ચૂર્ણપદૈશ્ચિત્રૈરુપર્યુપરિ પાતિતૈઃ ।
પન્નગાનાં ગતિઃ કાર્યા પાદૈઃ સ્વસ્તિકસંજ્ઞિતૈઃ ॥ ૧૦૯॥

પાર્શ્વક્રાન્તં પદં કુર્યાત્ સ્વસ્તિકં રેચયેદિહ ।
વિટસ્યાપિ તુ કર્તવ્યા ગતિર્લલિતવિક્રમા ॥ ૧૧૦॥

પાદૈરાકુઞ્ચિતૈઃ કિઞ્ચિત્ તાલાભ્યન્તરપાતિતૈઃ ।
સ્વસૌષ્ઠવસમાયુક્તૌ તથા હસ્તૌ પદાનુગૌ ॥ ૧૧૧॥

ખટકાવર્ધમાનૌ તુ કૃત્વા વિટગતિં વ્રજેત્ ।
કઞ્ચુકીયસ્ય કર્તવ્યા વયોવસ્થાવિશેષતઃ ॥ ૧૧૨॥

અવૃદ્ધસ્ય પ્રયોગજ્ઞો ગતિમેવં પ્રયોજયેત્ ।
અર્ધતાલોત્થિતૈઃ પાદૈર્વિષ્કમ્ભૈઃ ઋજુભિસ્તથા ॥ ૧૧૩॥

સમુદ્વહન્નિવાઙ્ગાનિ પઙ્કલગ્ન ઇવ વ્રજેત્ ।
અથ વૃદ્ધસ્ય કર્તવ્યા ગતિઃ કમ્પિતદેહિકા ॥ ૧૧૪॥

વિષ્કમ્ભનકૃતપ્રાણા મન્દોત્ક્ષિપ્તપદક્રમા ।
કૃશસ્યાપ્યભિનેયા વૈ ગતિર્મન્દપરિક્રમા ॥ ૧૧૫॥

વ્યાધિગ્રસ્તે જ્વરાર્તે ચ તપઃશ્રાન્તે ક્ષુધાન્વિતે ।
વિષ્કમ્ભનકૃતપ્રાણઃ કૃશઃ ક્ષામોદરસ્તથા ॥ ૧૧૬॥

ક્ષામસ્વરકપોલશ્ચ દીનનેત્રસ્તથૈવ ચ ।
શનૈરુત્ક્ષેપણં ચૈવ કર્તવ્યં હસ્તપાદયોઃ ॥ ૧૧૭॥

કમ્પનં ચૈવ ગાત્રાણાં ક્લેશનં ચ તથૈવ ચ ।
દૂરાધ્વાનં ગતસ્યાપિ ગતિર્મન્દપદક્રમા ॥ ૧૧૮॥

વિકૂણનં ચ ગાત્રસ્ય જાનુનોશ્ચ વિમર્દનમ્ ।

સ્થૂલસ્યાપિ તુ કર્તવ્યા ગતિર્દેહાનુકર્ષિણી ॥ ૧૧૯॥

સમુદ્વહનભૂયિષ્ઠા મન્દોત્ક્ષિપ્તપદક્રમા ।
વિષ્કમ્ભગામી ચ ભવેન્નિઃશ્વાસબહુલસ્તથા ॥ ૧૨૦॥

શ્રમસ્વેદાભિભૂતશ્ચ વ્રજેચ્ચૂર્ણપદૈસ્તથા ।
મત્તાનાં તુ ગતિઃ કાર્યા મદે તરુણમધ્યમે ॥ ૧૨૧॥

વામદક્ષિણપાદાભ્યાં ઘૂર્ણમાનાપસર્પણૈઃ ।
અવકૃષ્ટે પદે ચૈવ હ્યનવસ્થિતપાદિકા ॥ ૧૨૨॥

વિઘૂર્ણિતશરીરા ચ કરૈઃ પ્રસ્ખલિતૈસ્તથા ।
ઉન્મત્તસ્યાપિ કર્તવ્યા ગતિસ્ત્વનિયતક્રમા ॥ ૧૨૩॥

બહુચારીસમાયુક્તા લોકાનુકરણાશ્રયા ।
રૂક્ષસ્ફુટિતકેશશ્ચ રજોધ્વસ્તતનુસ્તથા ॥ ૧૨૪॥

અનિમિત્તપ્રકથનો બહુભાષી વિકારવાન્ ।
ગાયત્યકસ્માદ્ધસતિ સઙ્ગે ચાપિ ન સજ્જતે ॥ ૧૨૫॥

નૃત્યત્યપિ ચ સંહૃષ્ટો વાદયત્યપિ વા પુનઃ ।
કદાચિદ્ધાવતિ જવાત્ કદાચિદવતિષ્ઠતે ॥ ૧૨૬॥

કદાચિદુપવિષ્ટસ્તુ શયાનઃ સ્યાત્ કદાચન ।
નાનાચીરધરશ્ચૈવ રથ્યાસ્વનિયતાલયઃ ॥ ૧૨૭॥

ઉન્મત્તો ભવતિ હ્યેવં તસ્યૈતાં કારયેદ્ ગતિમ્ ।
સ્થિત્વા નૂપુરપાદેન દણ્ડપાદં પ્રસારયેત્ ॥ ૧૨૮॥

બદ્ધાં ચારીં તથા ચૈવ કૃત્વા સ્વસ્તિકમેવ ચ ।
અનેન ચારીયોગેન પરિભ્રામ્ય તુ મણ્ડલમ્ ॥ ૧૨૯॥

બાહ્યભ્રમરકં ચૈવ રઙ્ગકોણે પ્રસારયેત્ ।
ત્રિકં સુલલિતં કૃત્વા લતાખ્યં હસ્તમેવ ચ ॥ ૧૩૦॥

વિપર્યયગતૈર્હસ્તૈઃ પદ્ભ્યાં સહ ગતિર્ભવેત્ ।
ત્રિવિધા તુ ગતિઃ કાર્યા ખઞ્જપઙ્ગુકવામનૈઃ ॥ ૧૩૧॥

વિકલાઙ્ગપ્રયોગેણ કુહકાભિનયં પ્રતિ ।
એકઃ ખઞ્જગતૌ નિત્યં સ્તબ્ધો વૈ ચરણો ભવેત્ ॥ ૧૩૨॥

તથા દ્વિતીયઃ કાર્યસ્તુ પાદોઽગ્રતલસઞ્ચરઃ ।
સ્તબ્ધેનોત્થાપનં કાર્યમઙ્ગસ્ય ચરણેન તુ ॥ ૧૩૩॥

ગમનેન નિષણ્ણઃ સ્યાદન્યેન ચરણેન તુ ।
ઇતરેણ નિષીદેચ્ચ ક્રમેણાનેન વૈ વ્રજેત્ ॥ ૧૩૪॥

એષા ખઞ્જગતિઃ કાર્યા તલશલ્યક્ષતેષુ ચ ।
પાદેનાગ્રતલસ્થેન હ્યઞ્ચિતેન વ્રજેત્તથા ॥ ૧૩૫॥

નિષણ્ણદેહા પઙ્ગોસ્તુ નતજઙ્ઘા તથૈવ ચ ।
સર્વસઙ્કુચિતાઙ્ગા ચ વામને ગતિરિષ્યતે ॥ ૧૩૬॥

ન તસ્ય વિક્રમઃ કાર્યો વિક્ષેપશ્ચરણસ્ય ચ ।
સોદ્વાહિતા ચૂર્ણપદા સા કાર્યા કુહનાત્મિકા ॥ ૧૩૭॥

વિદૂષકસ્યાપિ ગતિર્હાસ્યત્રયસમન્વિતા ।
અઙ્ગવાક્યકૃતં હાસ્યં હાસ્યં નેપથ્યજં સ્મૃતમ્ ॥ ૧૩૮॥

દન્તુરઃ ખલતિઃ કુબ્જઃ ખઞ્જશ્ચ વિકૃતાનનઃ ।
ય ઈદૃશઃ પ્રવેશઃ સ્યાદઙ્ગહાસ્યં તુ તદ્ભવેત્ ॥ ૧૩૯॥

યદા તુ બકવદ્ગચ્છેદુલ્લોકિતવિલોકિતૈઃ ।
અત્યાયતપદત્વાચ્ચ અઙ્ગહાસ્યો ભવેત્સ તુ ॥ ૧૪૦॥

કાર્યહાસ્યં તુ વિજ્ઞેયમસંબદ્ધપ્રભાષણાત્ ।
અનર્થકૈર્વિકારૈશ્ચ તથા ચાશ્લીલભાષિતૈઃ ॥ ૧૪૧॥

ચીરચર્મમશીભસ્મગૈરિકાદ્યૈસ્તુ મણ્ડિતઃ ।
યસ્તાદૃશો ભવેદ્વિપ્રા હાસ્યો નેપથ્યજસ્તુ સઃ ॥ ૧૪૨॥

તસ્માત્તુ પ્રકૃતિં જ્ઞાત્વા ભાવઃ કાર્યસ્તુ તત્ત્વતઃ ।
ગતિપ્રચારં વિભજેત્ નાનાવસ્થાન્તરાત્મકમ્ ॥ ૧૪૩॥

સ્વભાવજાયાં વિન્યસ્ય કુટિલં વામકે કરે ।
તદા દક્ષિણહસ્તે ચ કુર્યાચ્ચતુરકં પુનઃ ॥ ૧૪૪॥

પાર્શ્વમેકં શિરશ્ચૈવ હસ્તોઽથ ચરણસ્તથા ।
પર્યાયશઃ સન્નમયેલ્લયતાલવશાનુગઃ ॥ ૧૪૫॥

સ્વભાવજા તુ તસ્યૈષા ગતિરન્યા વિકારજા ।
અલાભલાભાત્ મુક્તસ્ય સ્તબ્ધા તસ્ય ગતિર્ભવેત્ ॥ ૧૪૬॥

કાર્યા ચૈવ હિ નીચાનાં ચેટાદીનાં પરિક્રમાત્ ।
અધમા ઇતિ યે ખ્યાતા નાનાશીલાશ્ચ તે પુનઃ ॥ ૧૪૭॥

પાર્શ્વસેકં શિરશ્ચૈવ કરઃ સચરણસ્તથા ।
શકારસ્યાપિ કર્તવ્યા ગતિશ્ચઞ્ચલદેહિકા ।
ગતૌ નમેત ચેટાનાં દૃષ્ટિશ્ચાર્ધવિચારિણી ॥ ૧૪૮॥

વસ્ત્રાભરણસંસ્પર્શૈર્મુહુર્મુહુરવેક્ષિતૈઃ ।
ગાત્રૈર્વિકારવિક્ષિપ્તૈઃ લમ્બવસ્ત્રસ્રજા તથા ॥ ૧૪૯॥

સગર્વિતા ચૂર્ણપદા શકારસ્ય ગતિર્ભવેત્ ।
જાત્યા નીચેષુ યોક્તવ્યા વિલોકનપરા ગતિઃ ॥ ૧૫૦॥

અસંસ્પર્શાચ્ચ લોકસ્ય સ્વાઙ્ગાનિ વિનિગૂહ્ય ચ ।
મ્લેચ્છાનાં જાતયો યાસ્તુ પુલિન્દશબરાદયઃ ॥ ૧૫૧॥

તેષાં દેશાનુસારેણ કાર્યં ગતિવિચેષ્ટિતમ્ ।
પક્ષિણાં શ્વાપદાનાં ચ પશૂનાં ચ દ્વિજોત્તમાઃ ॥ ૧૫૨॥

સ્વસ્વજાતિસમુત્થેન સ્વભાવેન ગતિર્ભવેત્ ।
સિંહર્ક્ષવાનરાણાં ચ ગતિઃ કાર્યા પ્રયોક્તૃભિઃ ॥ ૧૫૩॥

યા કૃતા નરસિંહેન વિષ્ણુના પ્રભવિષ્ણુના ।
આલીઢસ્થાનકં કૃત્વા ગાત્રં તસ્યૈવ ચાનુગમ્ ॥ ૧૫૪॥

જાનૂપરિ કરં હ્યેકમપરં વક્ષસિ સ્થિતમ્ ।
અવલોક્ય દિશઃ કૃત્વા ચિબુકં બાહુમસ્તકે ॥ ૧૫૫॥

ગન્તવ્યં વિક્રમૈર્વિપ્રાઃ પઞ્ચતાલાન્તરોત્થિતૈઃ ।
નિયુદ્ધસમયે ચૈવ રઙ્ગાવતરણે તથા ॥ ૧૫૬॥

સિંહાદીનાં પ્રયોક્તવ્યા ગતિરેષા પ્રયોક્તૃભિઃ ।
શેષાણામર્થયોગેન ગતિં સ્થાનં ચ યોજયેત્ ॥ ૧૫૭॥

વાહનાર્થપ્રયોગેષુ રઙ્ગાવતરણેષુ ચ ।
એવમેતાઃ પ્રયોક્તવ્યા નરાણાં ગતયો બુધૈઃ ॥ ૧૫૮॥

નોક્તા યા યા મયા હ્યત્ર ગ્રાહ્યાસ્તાસ્તાશ્ચ લોકતઃ ।
અતઃ પરં પ્રવક્ષ્યામિ સ્ત્રીણાં ગતિવિચેષ્ટિતમ્ ॥ ૧૫૯॥

સ્ત્રીણાં સ્થાનાનિ કાર્યાણિ ગતિષ્વાભરણેષુ ચ ।
આયતં ચાવહિત્થં ચ અશ્વક્રાન્તમથાપિ ચ ॥ ૧૬૦॥

સ્થાનાન્યેતાનિ નારીણામથ લક્ષણમુચ્યતે ।
વામઃ સ્વભાવતો યત્ર પાદો વિરચિતઃ સમઃ ॥ ૧૬૧॥

તાલમાત્રાન્તરે ન્યસ્તસ્ત્ર્યશ્રઃ પક્ષસ્થિતોઽપરઃ ।
પ્રસન્નમાનનમુરઃ સમં યત્ર સમુન્નતમ્ ॥ ૧૬૨॥

લતાનિતમ્બગૌ હસ્તૌ સ્થાનં જ્ઞેયં તદાયતમ્ ।
દક્ષિણસ્તુ સમઃ પાદઃ ત્ર્યશ્રઃ પક્ષસ્થિતોઽપરઃ ॥ ૧૬૩॥

વામઃ સમુન્નતકટિશ્ચાયતે સ્થાનકે ભવેત્ ।
આવાહને વિસર્ગે ચ તથા નિર્વર્ણનેષુ ચ ॥ ૧૬૪॥

ચિન્તાયાં ચાવહિત્થે ચ સ્થાનમેતત્ પ્રયોજયેત્ ।
રઙ્ગાવતરણારમ્ભઃ પુષ્પાઞ્જલિવિસર્જનમ્ ॥ ૧૬૫॥

મન્મથેર્ષ્યોદ્ભવં કોપં તર્જન્યઙ્ગુલિમોટનમ્ ।
નિષેધગર્વગામ્ભીર્યમૌનં માનાવલમ્બનમ્ ॥ ૧૬૬॥

સ્થાનેઽસ્મિન્ સંવિધાતવ્યં દિગન્તરનિરૂપણમ્ ।
સમો યત્ર સ્થિતો વામસ્ત્ર્યશ્રઃ પક્ષસ્થિતોઽપરઃ ॥ ૧૬૭॥

સમુન્નતકટિર્વામસ્ત્વવહિત્થં તુ તદ્ભવેત્ ।
પુરો વિચલિતસ્ત્ર્યશ્રસ્તદન્યોપસૃતઃ સમઃ ॥ ૧૬૮॥

પાદસ્તાલાન્તરન્યસ્તસ્ત્રિકમીષત્સમુન્નતમ્ ।
પાણિર્લતાખ્યો યત્રૈકસ્તદન્યસ્તુ નિતમ્બગઃ ॥ ૧૬૯॥

અવહિત્થં સમાખ્યાતં સ્થાનમાગમભૂષણૈઃ ।
સ્ત્રીણામેતત્ સ્મૃતં સ્થાનં સંલાપે તુ સ્વભાવજે ॥ ૧૭૦॥

નિશ્ચયે પરિતોષે ચ વિતર્કે ચિન્તને તથા ।
વિલાસલીલાવિબ્વોકશ‍ૃંગારાત્મનિરૂપણે ॥ ૧૭૧॥

સ્થાનમેતત્પ્રયોક્તવ્યં ભર્તુર્માર્ગવિલોકને ।
પાદઃ સમસ્થિતશ્ચૈક એકશ્ચાગ્રતલાઞ્ચિતઃ ॥ ૧૭૨॥

સૂચીવિદ્ધમવિદ્ધં વા તદશ્વક્રાન્તમુચ્યતે ।
સ્ખલિતં ઘૂર્ણિતં ચૈવ ગલિતામ્બરધારણમ્ ॥ ૧૭૩॥

કુસુમસ્તબકાદાનં પરિરક્ષણમેવ ચ ।
વિત્રાસનં સલલિતં તરુશાખાવલમ્બનમ્ ॥ ૧૭૪॥

સ્થાનેઽસ્મિન્ સંવિધાનીયં સ્ત્રીણામેતત્પ્રયોક્તૃભિઃ ।
શાખાવલમ્બને કાર્યં સ્તબકગ્રહણે તથા ॥ ૧૭૫॥

વિશ્રામેષ્વથ દેવાનાં નરાણાં ચાર્થયોગતઃ ।
સ્થાનકં તાવદેવ સ્યાદ્યાવચ્ચેષ્ટા પ્રવર્તતે ॥ ૧૭૬॥

ભગ્નં ચ સ્થાનકં નૃત્તે ચારી ચેત્સમુપસ્થિતા ।
એવં સ્થાનવિધિઃ કાર્યઃ સ્ત્રીણાં નૃણામથાપિ ચ ॥ ૧૭૭॥

પુનશ્ચાસાં પ્રવક્ષ્યામિ ગતિં પ્રકૃતિસંસ્થિતામ્ ।
કૃત્વાવહિત્થં સ્થાનં તુ વામં ચાધોમુખં કરમ્ ॥ ૧૭૮॥

નાભિપ્રદેશે વિન્યસ્ય સવ્યં ચ ખટકામુખમ્ ।
તતઃ સલલિતં પાદં તાલમાત્રસમુત્થિતમ્ ॥ ૧૭૯॥

દક્ષિણં વામપાદસ્ય બાહ્યપાર્શ્વે વિનિક્ષિપેત્ ।
તેનૈવ સમકાલં ચ લતાખ્યં વામકં ભુજમ્ ॥ ૧૮૦॥

દક્ષિણં વિનમેત્પાર્શ્વં ન્યસેન્નાભિતટે તતઃ ।
નિતમ્બે દક્ષિણં કૃત્વા હસ્તં ચોદ્વેષ્ટ્ય વામકમ્ ॥ ૧૮૧॥

તતો વામપદં દદ્યાત્ લતાહસ્તં ચ દક્ષિણમ્ ।
લીલયોદ્વાહિતેનાથ શિરસાનુગતેન ચ ॥ ૧૮૨॥

કિઞ્ચિન્નતેન ગાત્રેણ ગચ્છેત્પઞ્ચપદીં તતઃ ।
યો વિધિઃ પુરુષાણાં તુ રઙ્ગપીઠપરિક્રમે ॥ ૧૮૩॥

સ એવ પ્રમદાનાં વૈ કર્તવ્યો નાટ્યયોક્તૃભિઃ ।
ષટ્કલં તુ ન કર્તવ્યં તથાષ્ટકલમેવ ચ ॥ ૧૮૪॥

પાદસ્ય પતનં તજ્જ્ઞૈઃ ખેદનં તદ્ભવેત્સ્ત્રિયાઃ ।
સયૌવનાનાં નારીણામેવં કાર્યા ગતિર્બુધૈઃ ॥ ૧૮૫॥

સ્થવીયસીનામેતાસાં સમ્પ્રવક્ષ્યામ્યહં ગતિમ્ ।
કૃત્વાપવિદ્ધં સ્થાનન્તુ વામં ન્યસ્ય કટીતટે ॥ ૧૮૬॥

આદ્યં ચારાલમુત્તાનં કુર્યાન્નાભિસ્તનાન્તરે ।

ન નિષણ્ણં ન ચ સ્તબ્ધં ન ચાપિ પરિવાહિતમ્ ॥ ૧૮૭॥

કૃત્વા ગાત્રં તતો ગચ્છેત્તેનૈવેહ ક્રમેણ તુ ।
પ્રેષ્યાણામપિ કર્તવ્યા ગતિરુદ્ભ્રાન્તગામિની ॥ ૧૮૮॥

ક્વચિદુન્નમિતૈર્ગાત્રૈઃ આવિદ્ધભુજવિક્રમા ।
સ્થાનં કૃત્વાવહિત્થં ચ વામં ચાધોમુખં ભુજમ્ ॥ ૧૮૯॥

નાભિપ્રદેશે વિન્યસ્ય સવ્યં ચ ખટકામુખમ્ ।
અર્ધનારીગતિઃ કાર્યા સ્ત્રીપુંસાભ્યાં વિમિશ્રિતા ॥ ૧૯૦॥

ઉદાત્તલલિતૈર્ગાત્રૈઃ પાદૈર્લીલાસમન્વિતૈઃ ।
યા પૂર્વમેવાભિહિતા હ્યુત્તમાનાં ગતિર્મયા ॥ ૧૯૧॥

સ્ત્રીણાં કાપુરુષાણાં ચ તતોઽર્ધાર્ધં તુ યોજયેત્ ।
મધ્યમોત્તમનીચાનાં નૃણાં યદ્ ગતિચેષ્ટિતમ્ ॥ ૧૯૨॥

સ્ત્રીણાં તદેવ કર્તવ્યા લલિતૈઃ પદવિક્રમૈઃ ।
બાલાનામપિ કર્તવ્યા સ્વચ્છન્દપદવિક્રમા ॥ ૧૯૩॥

ન તસ્યાઃ સૌષ્ઠવં કાર્યં ન પ્રમાણં પ્રયોક્તૃભિઃ ।
તૃતીયા પ્રકૃતિઃ કાર્યા નામ્ના ચૈવ નપુંસકા ॥ ૧૯૪॥

નરસ્વભાવમુત્સૃજ્ય સ્ત્રીગતિં તત્ર યોજયેત્ ।
વિપર્યયઃ પ્રયોક્તવ્યઃ પુરુષસ્ત્રીનપુંસકે ॥ ૧૯૫॥

સ્વભાવમાત્મનસ્ત્યક્ત્વા તદ્ભાવગમનાદિહ ।
વ્યાજેન ક્રીડયા વાપિ તથા ભૂયં ચ વઞ્ચનાત્ ॥ ૧૯૬॥

સ્ત્રી પુંસઃ પ્રકૃતિં કુર્યાત્ સ્ત્રીભાવં પુરુષોઽપિ ચ ।
ધૈર્યોદાર્યેણ સત્ત્વેન બુદ્ધ્યા તદ્વચ્ચ કર્મણા ॥ ૧૯૭॥

સ્ત્રી પુમાંસં ત્વભિનયેત્ વેષવાક્યવિચેષ્ટિતૈઃ ।
સ્ત્રીવેષભાષિતૈર્યુક્તં પ્રેષિતાપ્રેષિતૈસ્તથા ॥ ૧૯૮॥

મૃદુસન્નગતિશ્ચૈવ પુમાન્ સ્ત્રીભાવમાચરેત્ ।
જાતિહીનાશ્ચ યા નાર્યઃ પુલિન્દશબરાઙ્ગનાઃ ॥ ૧૯૯॥

યાશ્ચાપિ તાસાં કર્તવ્યા તજ્જાતિસદૃશી ગતિઃ ।
વ્રતસ્થાનાં તપઃસ્થાનાં લિઙ્ગસ્થાનાં તથૈવ ચ ॥ ૨૦૦॥

ખસ્થાનાં ચૈવ નારીણાં સમપાદં પ્રયોજયેત્ ।
ઉદ્ધતા યેઽઙ્ગહારાઃ સ્યુઃ યાશ્ચાર્યો મણ્ડલાનિ ચ ॥ ૨૦૧॥

તાનિ નાટ્યપ્રયોગજ્ઞૈર્ન કર્તવ્યાનિ યોષિતામ્ ।
તથાસનવિધિઃ કાર્યો નૃણાં સ્ત્રીણાં વિશેષતઃ ॥ ૨૦૨॥

નાનાભાવસમાયુક્તસ્તથા ચ શયનાશ્રયઃ ।
વિષ્કમ્ભિતાઞ્ચિતૌ પાદૌ ત્રિકં કિઞ્ચિત્સમુન્નતમ્ ॥ ૨૦૩॥

હસ્તૌ કટ્યૂરુવિન્યસ્તૌ સ્વસ્થે સ્યાદુપવેશને ।
પાદઃ પ્રસારિતઃ કિઞ્ચિદેકશ્ચૈવાસનાશ્રયઃ ॥ ૨૦૪॥

શિરઃ પાર્શ્વનતં ચૈવ સચિન્ત ઉપવેશને ।
ચિબુકોપાશ્રિતૌ હસ્તૌ બાહુશીર્ષાશ્રિતં શિરઃ ॥ ૨૦૫॥

સમ્પ્રણષ્ટેન્દ્રિયમનાઃ શોકૌત્સુક્યોપવેશને ।
પ્રસાર્ય બાહૂ શિથિલૌ તથા શ્રોપાશ્રયાશ્રિતઃ ॥ ૨૦૬॥

મોહમૂર્ચ્છામદગ્લાનિવિષાદેષૂપવેશયેત્ ।
સર્વપિણ્ડીકૃતાઙ્ગસ્તુ સંયુક્તૈઃ પાદજાનુભિઃ ॥ ૨૦૭॥

વ્યાધિવ્રીડિતનિદ્રાસુ ધ્યાને ચોપવિશેન્નરઃ ।
તથા ચોત્કટિકં સ્થાનં સ્ફિક્પાર્ષ્ણીનાં સમાગમઃ ॥ ૨૦૮॥

પિત્ર્યે નિવાપે જપ્યે ચ સન્ધ્યાસ્વાચમનેઽપિ ચ ।
વિષ્કમ્ભિતં પુનશ્ચૈવં જાનું ભૂમૌ નિપાતયેત્ ॥ ૨૦૯॥

પ્રિયાપ્રસાદને કાર્યે હોમાદિકરણેષુ ચ ।
મહીગતાભ્યાં જાનુભ્યામધોમુખમવસ્થિતમ્ ॥ ૨૧૦॥

દેવાભિગમને ચૈવ રુષિતાનાં પ્રસાદને ।
શોકે ચાક્રન્દને તીવ્રે મૃતાનાં ચૈવ દર્શને ॥ ૨૧૧॥

ત્રાસને ચ કુસત્ત્વાનાં નીચાનાં ચૈવ યાચને ।
હોમયજ્ઞક્રિયાયાં ચ પ્રેષ્યાણાં ચૈવ કારયેત્ ॥ ૨૧૨॥

મુનીનાં નિયમેષ્વેષ ભવેદાસનજો વિધિઃ ।
તથાસનવિધિઃ કાર્યો વિવિધો નાટકાશ્રયઃ ॥ ૨૧૩॥

સ્ત્રીણાં ચ પુરુષાણાં ચ બાહ્યશ્ચાભ્યન્તરસ્તથા ।
આભ્યન્તરસ્તુ નૃપતેર્બાહ્યો બાહ્યગતસ્ય ચ ॥ ૨૧૪॥

દેવાનાં નૃપતીનાં ચ દદ્યાત્ સિંહાસનં દ્વિજઃ ।
પુરોધસામમાત્યાનાં ભવેદ્વેત્રાસનં તથા ॥ ૨૧૫॥

મુણ્ડાસનં ચ દાતવ્યં સેનાનીયુવરાજયોઃ ।
કાષ્ઠાસનં દ્વિજાતીનાં કુમારાણાં કુથાસનમ્ ॥ ૨૧૬॥

એવં રાજસભાં પ્રાપ્ય કાર્યસ્ત્વાસનજો વિધિઃ ।
સ્ત્રીણાં ચાપ્યાસનવિધિં સમ્પ્રવક્ષ્યામ્યહં પુનઃ ॥ ૨૧૭॥

સિંહાસનં તુ રાજ્ઞીનાં દેવીનાં મુણ્ડમાસનમ્ ।
પુરોધોઽમાત્યપત્નીનાં દદ્યાદ્વેત્રાસનં તથા ॥ ૨૧૮॥

ભોગિનીનાં તથા ચૈવ વસ્ત્રં ચર્મ કુથોઽપિ વા ।
બ્રાહ્મણીતાપસીનાં ચ પટ્ટાસનમથાપિ ચ ॥ ૨૧૯॥

વેશ્યાનાં ચ પ્રદાતવ્યમાસનં ચ મયૂરકમ્ ।
શેષાણાં પ્રમદાનાં તુ ભવેદ્ ભૂમ્યાસનં દ્વિજાઃ ॥ ૨૨૦॥

એવમાભ્યન્તરો જ્ઞેયો બાહ્યશ્ચાસનજો વિધિઃ ।
તથા સ્વગૃહવાર્તાસુ ચ્છન્દેનાસનમિષ્યતે ॥ ૨૨૧॥

નિયમસ્થમુનીનાં ચ ભવેદાસનજો વિધિઃ ।
લિઙ્ગિનામાસનવિધિઃ કાર્યો વ્રતસમાશ્રયઃ ॥ ૨૨૨॥

બ્રુષીમુણ્ડાસનપ્રાયં વેત્રાસનમથાપિ ચ ।
હોમે યજ્ઞક્રિયાયાં ચ પિત્ર્યેઽર્થે ચ પ્રયોજયેત્ ॥ ૨૨૩॥

સ્થાનીયા યે ચ પુરુષાઃ કુલવિદ્યાસમન્વિતાઃ ।
તેષામાસનસત્કારઃ કર્ત્તવ્ય ઇહ પાર્થિવૈઃ ॥ ૨૨૪॥

સમે સમાસનં દદ્યાત્ મધ્યે મધ્યમમાસનમ્ ।
અતિરિક્તેઽતિરિક્તં ચ હીને ભૂમ્યાસનં ભવેત્ ॥ ૨૨૫॥

ઉપાધ્યાયસ્ય નૃપતેર્ગુરૂણામગ્રતો બુધૈઃ ।
ભૂમ્યાસનં તથા કાર્યમથવા કાષ્ઠમાસનમ્ ॥ ૨૨૬॥

નૌનાગરથયાનેષુ ભૂમિકાષ્ઠાસનેષુ ચ ।
સહાસનં ન દુષ્યેત ગુરૂપાધ્યાયપાર્થિવૈઃ ॥ ૨૨૭॥

આકુઞ્ચિતં સમં ચૈવ પ્રસારિતવિવર્તને ।

ઉદ્વાહિતં નતં ચૈવ શયને કર્મ કીર્ત્યતે ॥ ૨૨૮॥

સર્વૈરાકુઞ્ચિતૈરઙ્ગૈઃ શય્યાવિદ્ધે તુ જાનુની ।
સ્થાનમાકુઞ્ચિતં નામ શીતાર્તાનાં પ્રયોજયેત્ ॥ ૨૨૯॥

ઉત્તાનિતમુખં ચૈવ સ્રસ્તમુક્તકરં તથા ।
સમં નામ પ્રસુપ્તસ્ય સ્થાનકં સંવિધીયતે ॥ ૨૩૦॥

એકં ભુજમુપાધાય સમ્પ્રસારિતજાનુકમ્ ।
સ્થાનં પ્રસારિતં નામ સુખસુપ્તસ્ય કારયેત્ ॥ ૨૩૧॥

અધોમુખસ્થિતં ચૈવ વિવર્તિતમિતિ સ્મૃતમ્ ।
શસ્ત્રક્ષતમૃતોત્ક્ષિપ્તમત્તોન્મત્તેષુ કારયેત્ ॥ ૨૩૨॥

અંસોપરિ શિરઃ કૃત્વા કર્પૂરક્ષોભમેવ ચ ।
ઉદ્વાહિતં તુ વિજ્ઞેયં લીલયા વેશને પ્રભોઃ ॥ ૨૩૩॥

ઈષત્પ્રસારિતે જઙ્ઘે યત્ર સ્રસ્તૌ કરાવુભૌ ।
આલસ્યશ્રમખેદેષુ નતં સ્થાનં વિધીયતે ॥ ૨૩૪॥

ગતિપ્રાચારસ્તુ મયોદિતોઽયં
નોક્તશ્ચ યઃ સોઽર્થવશેન સાધ્યઃ ।
અતઃ પરં રઙ્ગપરિક્રમસ્ય
વક્ષ્યામિ કક્ષ્યાં પ્રવિભાગયુક્તામ્ ॥ ૨૩૫॥

॥ ઇતિ ભરતીયે નાટ્યશાસ્ત્રે ગતિપ્રચારો નામ દ્વાદશોઽધ્યાયઃ ॥

Encoded by Sowmya Krishnapur krsowmya@yahoo at com

*Natya Shastra Chapter 12 gatiprachAra*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*